श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीनारदपुराणे

# ॥ श्री वरदराज स्तोत्रम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

# ॥ श्री वरदराज स्तोत्रम् ॥

श्रीमद्वरदराजेन्द्रः श्रीवत्साङ्कः शुभप्रदः ।
तुण्डीरमण्डलोल्लासी तापत्रय निवारकः ॥ १ ॥

सत्यव्रत क्षेत्रवासी सत्यस्सज्जनपोषकः ।
सर्गस्थित्युपसंहारकारी सुगुणवारिधिः ॥ २ ॥

हरिर्हस्तिगिरीशानः हृतप्रणतदुष्कृतः ।
तत्वरूपस्त्वष्ट्रकृत काञ्चीपुर वराश्रितः ॥ ३ ॥

ब्रह्मारब्धाश्वमेधाख्य महामखसुपूजितः ।
वेदवेद्यो वेगवतीवेगभीतात्मभूस्ततः ॥ ४ ॥

विश्वसेतुर्वेगवतीसेतुर्विश्वाधिकोऽनघः ।
यथोक्तकारिनामाढ्यः यज्ञभृद्यज्ञरक्षकः ॥ ५ ॥

ब्रह्मकुण्डासन्नदिव्य पुण्यकोटिविमानगः ।
वाणीपत्यर्पितहय वपासुरखिलाधरः ॥ ६ ॥

वरदाभयहस्ताब्जः वनमालाविराजितः ।
शङ्खचक्रलसत्पाणिः शरणागतरक्षकः ॥ ७ ॥

इमं स्तवन्तु पापघ्नं पुरुषार्थ प्रदायकम् ।
पठतां शृण्वतां भक्त्या सर्वसिद्धिर्भवेद्ध्रुवम् ॥ ८ ॥

॥ इति श्री वरदराज स्तोत्रं संपूर्णम् ॥

www.prapatti.com